# ॥ श्रीनृसिंहस्तुतिः ॥

उदयरवि सहस्रद्योतितं रूक्षवीक्षं
प्रळय जलधिनादं कल्पकृद्वह्निवक्त्रम् ।
सुरपतिरिपु वक्षश्छेद रक्तोक्षितांगं
प्रणतभयहरं तं नारसिंहं नमामि (नतोऽस्मि) ॥

प्रळयरवि कराळाकार रुक्चक्रवालं
विरळय दुरुरोची रोचिताशांतराल ।
प्रतिभयतम कोपात्त्युत्कटोच्चाट्टहासिन्
दह दह नरसिंहासह्यवीर्याहितं मे ॥ १ ॥

सरस रभसपादा पातभाराभिराव–
प्रचकितचल सप्तद्वंद्व लोकस्तुतस्त्वम् ।
रिपुरुधिर निषेकेणेव शोणांघ्रिशालिन्
दह दह नरसिंहासह्यवीर्याहितं मे ॥ २ ॥

तव घनघनघोषो घोरमाघ्राय जंघा–
परिघ मलघु मूरु व्याजतेजो गिरिं च ।
घनविघटितमागाद्दैत्य जंघलसंघो
दह दह नरसिंहासह्यवीर्याहितं मे ॥ ३ ॥

कटकि कटकराजद्दाट्ट काग्र्यस्थलाभ
प्रकट पट तटिस्थे सत्कटिस्थाऽतिपट्वी ।
कटुक कटुक दुष्टाटोप दृष्टिप्रमुष्टौ
दह दह नरसिंहासह्यवीर्याहितं मे ॥ ४ ॥

प्रखर नखर वज्रोत्खात् रूक्षारिवक्षः
शिखरि शिखर रक्तैराक्तसंदोह देह ।
सुवलिभ शुभ कुक्षे भद्र गंभीरनाभे
दह दह नरसिंहासह्यवीर्याहितं मे ॥ ५ ॥

स्फुरयति तव साक्षात्सैव नक्षत्रमाला
क्षपित दितिज वक्षो व्याप्तनक्षत्रमार्गम् ।
अरिदरधर जान्वासक्त हस्तद्वयाहो
दह दह नरसिंहासह्यवीर्याहितं मे ॥ ६ ॥

कटुविकट सटौघोद्घट्टनाद्भ्रष्टभूयो–
घनपटल विशालाकाश लब्धावकाशम् ।
करपरिघ विमर्द प्रोद्यमं ध्यायतस्ते
दह दह नरसिंहासह्यवीर्याहितं मे ॥ ७ ॥

हठलुठदल घिष्टोत्कंठदष्टोष्ठ विद्युत्
सटशठ कठिनोरः पीठभित्सुष्ठुनिष्ठाम् ।
पठतिनुतव कंठाधिष्ठ घोरांत्रमाला
दह दह नरसिंहासह्यवीर्याहितं मे ॥ ८ ॥

हतबहुमिहि राभासह्यसंहाररंहो–
हुतवह बहुहेति ह्रेपिकानंत हेति ।
अहित विहित मोहं संवहन् सैंहमास्यं
दह दह नरसिंहासह्यवीर्याहितं मे ॥ ९ ॥

गुरुगुरुगिरिराजत्कंदरांतर्गते वा
दिनमणि मणिशृंगे वंतवह्निप्रदीप्ते ।
दधदति कटुदंष्ट्रे भीषणोज्जिह्ववक्त्रे
दह दह नरसिंहासह्यवीर्याहितं मे ॥ १० ॥

अधरित विबुधाब्धि ध्यानधैर्यं विदीध्य–
विविध विबुधधी श्रद्धापीतेंद्रारिनाशम् ।
विदधदति कटाहोद्धट्टनेद्धाट्टहासं
दह दह नरसिंहासह्यवीर्याहितं मे ॥ ११ ॥

त्रिभुवन तृणमात्र त्राण तृष्णां तु नेत्र–
त्रयमति लघितार्चिर्विष्ट पाविष्टपादम् ।
नवतर रवि ताम्रं धारयन् रूक्षवीक्षं
दह दह नरसिंहासह्यवीर्याहितं मे ॥ १२ ॥

भ्रमद भिभव भूभृद्भूरिभूभारसद्भि–
द्भिदनव विदवभ्रू विभ्रमादभ्र शुभ्र ।
ऋभुभव भय भेत्तार्भासि भो भो विभाभिर्दह
दह नरसिंहासह्यवीर्याहितं मे ॥ १३ ॥

श्रवण खचित चंचत्कुंड लोच्चंडगंड
भ्रुकुटि कटुललाट श्रेष्ठनासारुणोष्ठ ।
वरद सुरद राजत्केसरोत्सारितारे
दह दह नरसिंहासह्यवीर्याहितं मे ॥ १४ ॥

प्रविकच कचराजद्रत्न कोटीरशालिन्
गलगत गलदुस्रोदार रत्नांगदाढ्य ।
कनक कटक कांची शिंजिनी मुद्रिकावन्
दह दह नरसिंहासह्यवीर्याहितं मे ॥ १५ ॥

अरिदरमसि खेटौ बाणचापे  गदां स–
न्मुसलमपि कराभ्यामंकुशं पाशवर्यां ।
करयुगळ धृतांत्रस्रग्विभिन्नारिवक्षो
दह दह नरसिंहासह्यवीर्याहितं मे ॥ १६ ॥

चट चट चट दूरं मोहया भ्रामयारिन्
कडि कडि कडि कायं ज्वारय स्फोटयस्व ।
जहि जहि जहि वेगं शात्रवं सानुबंधं
दह दह नरसिंहासह्यवीर्याहितं मे ॥ १७ ॥

विधिभव विबुधेश भ्रामकाग्निस्फुलिंग–
प्रसवि विकट दंष्ट्रोज्जिह्वक्त्र त्रिनेत्र ।
कल कल कल कामं पाहि मां ते सुभक्तं
दह दह नरसिंहासह्यवीर्याहितं मे ॥ १८ ॥

कुरु कुरु करुणां तां सांकुरां दैत्यपोते
दिश दिश विशदां मे शाश्वतीं देवदृष्टिम् ।
जय जय जय मुर्तेऽनार्त जेतव्य पक्षं
दह दह नरसिंहासह्यवीर्याहितं मे ॥ १९ ॥

स्तुतिरियमहितघ्नी सेविता नारसिंही
तनुरिवपरिशांता मालिनी साभितोऽलम् ।
तदखिल गुरुमाग्र्य श्रीधरूपालसद्भिः
सुनियमनय कृत्यैः सद्गुणैर्नित्ययुक्ता ॥ २० ॥

लिकुचतिलकसूनुः सद्धितार्थानुसारी
नरहरिनुतिमेतां शत्रुसंहारहेतुम् ।
अकृत सकलपापध्वंसिनीं यः पठेत्तां
व्रजति नृहरिलोकं कामलोभाद्यसक्तः ॥ २१ ॥

इति श्रीमत्कविकुलतिलक श्री त्रिविक्रमपंडिताचार्यसुत

नारायणपंडिताचार्य विरचितं श्री नृसिंहस्तुतिः संपूर्णम्

॥ भारतीरमणमुख्यप्राणांतर्गत श्री कृष्णार्पणमस्तु ॥